# Bhagya Suktam in Hindi – भाग्य सूक्तम

ओं प्रातरग्निं प्रातरिन्द्रगं हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रगं हुवेम ॥ १ ॥

प्रातर्जितं भगमुग्रगं हुवेम वयं पुत्र-मदितेर्यो विधर्ता ।
आद्ध्रश्चिदयं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २ ॥

भग प्रणेत-र्भग सत्यराधो भगेमां धियमुदवददन्नः ।
भगप्रणो जनय गोभि-रश्वैर्भगप्रनृभि-र्नृवन्तस्स्याम ॥ ३ ॥

उतेदानीं भगवन्तस्स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्_थ्सूर्यस्य वयं देवानागं सुमतौ स्याम ॥ ४ ॥

भग एव भगवागं अस्तु देवास्तेन वयं भगवन्तस्स्याम ।
तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥ ५ ॥

समध्वरायोषसोऽनमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगन्नो रथमिवाऽश्वावाजिन आवहन्तु ॥ ६ ॥

अश्वावती-र्गोमती-र्न उषासो वीरवतीस्सद-मुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिस्सदा नः ॥ ७ ॥

Panotbook.com

यो माऽग्ने भा॒गिनग्ं॑ स॒न्तमथा॑भा॒गं चिकी॑ॠषति ।
अभा॒गम॑ग्ने॒ तं कु॑रु॒ माम॑ग्ने भा॒गिनं॑ कुरु ॥ ८ ॥

ओं शान्ति॒: शान्ति॒: शान्ति॑: ॥

इति श्री भाग्य सूक्तम् ॥